# नदीवाचकशब्दा ऋग्वेदश्च
**Nadīvācakaśabdā R̥gvedaśca**

**Dr. Ranu Ghosh**
Research Assistant
School of Vedic Studies
Rabindra Bharati University, Kolkata, West Bengal, India
Email: ranunandini17@gmail.com

**Abstract:** विश्वस्य प्राचीनतमा हृद्या, निरवद्या, सकलैरपेक्षितैः संस्कारैस्सम्पन्ना, साहित्य -काव्य-कोश-व्याकरणादि सर्वाङ्गैस्समन्विता अनादिकालतः काले काले परमात्मनावतीर्य संरक्षिता महोभिगौरवमण्डितास्ति संस्कृतभाषा। भाषायामस्यामेव एकशतमध्वर्युशाखा, सहस्रवर्त्मा सामवेदः, एकविंशतिधा बाह्वृच्यम्, नवधाऽथर्वाणो वेद इति महाभाष्योक्ताभिः[1] एकत्रिंशोत्तरैकादशशाखाभिः (११३१) समन्विताः ऋग्यजुः सामाथर्वाणो वेदाः शिक्षाकल्पनिरुक्तछन्दोज्योतिर्व्याकरणाख्यैः षड्भिः वेदाङ्गैस्समेधिता विराजन्तेतराम्। सनातनसंस्कृतेः समुज्ज्वलस्वरूपप्रकाशने वेदाः सन्ति विमलदर्पणकल्पाः। वेदास्त्वपौरुषेयाः, अपि तु परमेश्वरस्य निःश्वासात्समुद्भूताः। विश्वसाहित्ये सर्वतः प्राचीनतमो ग्रन्थः वेद एव ऐहिकामुष्मिकोभयविधश्रेयःसाधनस्य धर्मस्य तत्फलं दातुरीश्वरस्य च प्रकाशकः। उक्तं च –

"प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते।
एनं विदन्ति वेदेन तस्मात् वेदस्य वेदता"॥[2] इति।

निखिलेऽस्मिन् जगतीतले भारतवर्षस्य महती प्रतिष्ठा वेदमाश्रित्यैवास्ति। मानवजातेरितिवृत्तस्य आधुनिकभाषाविज्ञानस्य च स्वरूपं वेदाध्ययनेनैव परिशील्यते। इदमपि सत्यमतिरोहितमेवास्ति यद् शिक्षादिषडङ्गानां तथा षड्वेदाङ्गानां मौलिकानुशीलनं, पर्यालोचनं, मननं चान्तरेण वेदानां रहस्यं ज्ञातुमशक्यमेव। एतेषु शिक्षादिषु षड्वेदाङ्गेषु निरुक्तमेव वेदपुरुषस्य श्रोत्ररूपेण कल्पितम्। तदेव वेदस्य चतुर्थमङ्गमास्ते।

भगवता यास्केन निरुक्त-ग्रन्थस्य नैघण्टुक-नैगम-दैवतकाण्डरूपेण त्रिविधं काण्डं स्वीकृतम्। तेषु त्रिविधेषु काण्डेषु निघण्टु एव वैदिककोषग्रन्थः। तत्र गौरादिदेवपत्न्यन्तशब्दाः आम्नाता दृश्यन्ते। तेषामेव शब्दानां निर्वचनमस्माभिः निरुक्तग्रन्थे समुपलभ्यन्ते। निघण्टौ गौरादिदेवपत्न्यन्तेषु शब्देषु नदीवाचकशब्दानां रूपतत्त्वार्थसमीक्षणं ऋग्वैदिकसाहित्ये तेषां प्रयोगश्च गवेषणापत्रस्यास्य निदानभूतमेव।

**Keywords:** निघण्टुः, निघण्टुस्थिताः नदीवाचकशब्दाः, ऋग्वेदः, वैदिककोषः।

**अवतरणिका–**

संस्कृतसाहित्ये तथा विश्वसाहित्ये वेदाः खलु केयूरायन्ते। विद्यन्ते धर्मादयः पुरुषार्थाः

यस्मिन् ते वेदाः, इति बह्वृच्प्रातिशाख्यराद्धान्तः। सर्ववेदभाष्यकार-सायणाचार्यस्त्वपौरुषेयं वाक्यं वेद इत्यामनन्ति। यो ग्रन्थो वेदयति इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं स वेद इति ऋग्वेदभाष्यभूमिकायामाम्नातम्। अपि वा प्रत्यक्षानुमानागोचरं ज्ञानमनेनैवावगम्यत इति कृत्वास्याखिलशास्त्रमूलत्वमभ्युपगम्यते। मन्त्रब्राह्मणारण्यकोपनिषद्भेदेनायं चतुर्विधः। संहितापि चतुर्विधा ऋग्यजुःसामाथर्वभेदेन। वेदानां गूढार्थत्वात्तद्बोधनाय वेदार्थकुशलैराचार्यैर्वेदार्थेभ्यो निकृष्य सुबोधानि शिक्षादीनि षड् वेदाङ्गानि प्रवर्तितानि विद्यास्थानत्वेन। प्रधानञ्चेदं वेदाङ्गम्। इतरेभ्योऽङ्गेभ्यः सर्वशास्त्रेभ्यश्चार्थपरित्राणाभिनिवेशात्। शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति षडङ्गेष्वेतेषु निरुक्तं नाम ह्येकं वेदाङ्गम्। महर्षिपाणिनिना स्वशिक्षायां यथोक्तम् –

"छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते"॥[3] इति।

षड्वेदाङ्गेषु निरुक्तं नाम यत्र निर्वचनविधिना तत्तदर्थबोधनाय पदजातं निरुच्यते निःशेषेणोपदिश्यते। भगवता यास्केन नैघण्टुक-नैगम-दैवतकाण्डरूपेण त्रिविधं काण्डं स्वीकृतं निरुक्त-ग्रन्थस्य। तेषु त्रिविधेषु काण्डेषु निघण्टुस्थितस्य नदीवाचकशब्दानां रूपतत्त्वार्थसमीक्षणं ऋग्वैदिकसाहित्ये तेषां प्रयोगश्च गवेषणापत्रस्यास्य मुख्यविषयः।

**निघण्टु-शब्दस्यार्थः–**

षड्वेदाङ्गेषु निरुक्तं नाम यत्र निर्वचनविधया तत्तदर्थबोधनाय पदजातं निरुच्यते निःशेषेणोपदिश्यते। भगवता यास्केन नैघण्टुक-नैगम-दैवतकाण्डरूपेण त्रिविधं काण्डं स्वीकृतम्। निघण्टुस्तु वैदिककोषाभिधानपरो ग्रन्थः। कोषशब्देन शब्दराशिस्तथा शब्दसमष्टिरवगम्यते। गवादेर्देवपत्न्यन्तरेकचत्वारिंशच्छतत्रयाधिकसहस्रशब्दराशिरिह निघण्टुग्रन्थे विधृतः। तेन हि बोध्यते निघण्टुस्तावद्विशालः कोषग्रन्थः। अत्र खलु वैदिकशब्दानां समाम्नायो दृश्यते। स च शब्दाराशिः *सम्-सम्यक् आ-मर्यादया पारिपाट्या वा म्नायते आम्नायतेऽभ्यस्यत* इति व्युत्पत्त्याभिधीयते समाम्नायशब्देन। अत एव तस्य गवादेः शब्दसमूहस्य ग्रन्थाकारेण पूर्वाचार्यैः पठिततया प्रसिद्धमभिधानं निघण्टुवाख्यया।[4] एवञ्च मन्त्रार्थपरिज्ञानाय सोदाहरणं पञ्चाध्यायशास्त्रसंग्रहभावेन ऋषिभिरेकस्मिन्नाम्नाये शब्दराशेर्विधृतत्वात् सिद्धमिदं निघण्ट्वभिधानम्।[5] प्रसङ्गेऽस्मिन् नाट्यशास्त्रे उक्तं तत्रभवता ग्रन्थकारेण भरताचार्येण –

"नानानामाश्रयोत्पन्नं निघण्टुं निगमान्वितम्। धात्वर्थहेतुसंयुक्तं नानासिद्धान्तसाधितम्॥
स्थापितोऽत्र भवेद्यत्र समासेनार्थसूचकः। धात्वर्थवचनेनेह निरुक्तं तत्प्रचक्षते"॥[6] इति।

निघण्टुविधृतशब्दानामर्थपरितुबोधे सम्भवति मन्त्रार्थावगमः। वेदेभ्यः समाहृतानां तेषां हि

शब्दानां समाम्नायेनार्थज्ञानप्रतिपत्तेर्मन्त्रार्थप्रतिबद्धत्वाद् अर्थज्ञानसम्पादनेन निगमादुपपन्नं निघण्टुत्वम्। निपूर्वाद् गमेरौणादिकेन तुन्प्रत्ययेन पृषोदरादित्वाद् गकारतकारयोर्घकार-टकारत्वापत्तेः सिद्धं तदेव पदाभिधानम्। निश्चयेन (अर्थान्) गमयन्तीति (नि-गम् तुः=) निगन्तुः। उच्यते – *निगमनान्निघण्टव उच्यत इत्यौपमन्यवः*[7] इति।

पुनश्च, प्रकारान्तरेणापि[8] भवितुमर्हति निघण्टुशब्दस्य व्युत्पत्तिः। आहननं वचनं पाठः। *सूत्रे इदमाहतम्, ब्राह्मणे इदमाहतम्* इत्यादौ पाठार्थतया आङ्पूर्वाद्धन्तेः प्रयोगस्य दर्शनात्तस्मादेव धातोः पदस्योपपत्तेर्वर्णागमविपर्ययादिनियमप्रतिपत्त्या प्रसिद्धं निघण्टुत्वम्, तेषां शब्दानामेकत्र पाठात्। अपि वा समाहृताः[9] सन्तोऽपि एते शब्दाः निघण्टव उच्यन्ते सम् आ इत्येतयोरुपसर्गयोः स्थाने नि इत्युपसर्गाध्याहारेण हरतेर्हकारर्कारयोः घण्त्वापत्त्या उणादिकेन तुन्प्रत्ययेन वर्णाविकारात्तकारस्य टत्वेन नित्त्वात् टुवर्णाविशेषेण निघण्टुशब्दोपपत्तेः। यद्वा, निपूर्वाद् चुरादिगणे घटिधातोरपि शब्दोऽयं निष्पद्यते। तथा हि निर्वचनसमूहद्वारेण सम्भवति शब्दार्थप्रतिबोधः। प्रत्यक्ष-परोक्षातिपरोक्षवृत्तित्रयभेदेन शब्दस्य व्युत्पत्तेः सम्भवात् खल्वाकृतिवैचित्र्येण प्रतिपद्यते शब्दार्थज्ञानं गवादिशब्दार्थप्रतिबोधद्वारेण निगमान्निगन्तुत्वेन निघण्ट्वभिधानाधिगमात्। ग्रन्थस्यास्याध्यायपञ्चकत्वात् प्रत्यध्यायमपि तदाख्यया अभिव्यक्तेः तमिमं समाम्नायं निघण्टव इत्याचक्षते इत्येवं सङ्गतम्। नाम-आख्यात-निपात-उपसर्गैश्चतुर्भिः पदजातैर्ग्रन्थस्यास्य निघण्ट्वाख्यस्य स्वरूपं निर्णीतं निरुक्तकृद्यास्काचार्येण।[10] तत्रास्मिन् ग्रन्थे बह्वर्थवाचका एकशब्दा एकार्थवाचकाश्च नैकविधाः शब्दा उपलभ्यन्ते। गवादिदेवपत्न्यन्तेषु शब्देषु तेषामुपग्रहो भवतीति दृश्यते।

**निघण्टुस्थिताः नदीवाचकशब्दाः–**

निघण्टौ तत्र सप्तत्रिंशन्नदीनामानि सन्ति। तान्येव— अवनयः, यह्व्यः, स्वाः, सीराः, स्रोत्याः, एन्यः, धुनयः, रुजानाः, वक्षणाः, स्वादोअर्णाः, रोधचक्राः, हरितः, सरितः, अग्रुवः, नभन्वः, वध्वः, हिरण्यवर्णाः, रोहितः, सस्रुतः, अर्णाः, सिन्धवः, कुल्याः, वर्यः, उर्व्यः, इरावत्यः, पावत्यः, स्रवन्त्यः, ऊर्जस्वत्यः, पयस्वत्यः, सरस्वत्यः, तरस्वत्यः, हरस्वत्यः, रोधस्वत्यः, भास्वत्यः, अजिराः, मातरः, नद्यः इति।

**निघण्टौ प्रयुक्तानां नदीवाचकशब्दानां रूप-तत्त्वार्थसमीक्षणं ऋग्वैदिकसाहित्ये तेषां प्रयोगश्च–**

1. **अवनयः** — निघण्टूक्तेषु नदीवाचकेषु अवनय एव प्रथमशब्दः।[11] इदानीं शब्दस्यास्य रूपसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते –

(क) रूपार्थसमीक्षणम् – धातुपाठे भ्वादिगणे विविधार्थकबोधकेन अव-धातुना[12] सह औणादिकेन अनि-प्रत्यययोगोन[13] अवनि-पदं निष्पद्यते। तस्य बहुवचने अवनयः-इति सिद्धम्।

(ख) तत्त्वार्थसमीक्षणम् – अवन्ति रक्षन्ति जीवान्, वृक्षादीन्, मनुष्यान् इति अवनयः।[14] नद्यः स्वोदकेन जगत् अवन्ति रक्षन्ति। अपि च, जनाः तीरादिनिर्माणेन ताः नदीः अवन्ति

रक्षन्ति[15] इति कृत्वा अवनयः-इति पदेन नद्यः इत्यवगम्यन्ते।

(ग) प्रयोगः – *एकं यदुद्ना न पृणन्त्येनीरासिञ्चन्तीरवनयः समुद्रम्* (ऋ. – 5.85.6, सा.भा.– *अवनयः नद्यः। बह्व्यो नद्यः सर्वदोदकेन पूरयन्त्योऽपि नैकमपि समुद्रं पूरयन्तीति*) इति।

**2. यह्व्यः—** निघण्टूक्तेषु नदीवाचकेषु यह्वय एव द्वितीयपदम्।[16] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं—

(क) रूपार्थसमीक्षणम् – धातुपाठे अदादिगणे गमनार्थकेन या-धातुना[17] सह निपातनात् अ-प्रत्यययोगेन, धातोर्ह्रस्वे, हुगागमे,[18] ङीप्रत्यययोगेन च यह्वी-इति रूपं निष्पन्नम्। बहुवचने यह्व्यः इति रूपं सिद्धम्। अपि च, द्विधातुजं वा इदं नाम – यातश्च हूतश्च हवतीति। यातेर्ह्वयतेश्च *गेहे कः* इति सूत्रेण[19] बाहुलकाद्धूते कप्रत्ययो ह्वयतेःसम्प्रसारणाभावश्च।

(ख) तत्त्वार्थसमीक्षणम् – नद्यः तान् तान् प्रदेशान् गच्छन्ति। अपि च, प्राणिभिः ताः प्राप्यन्ते।[20] यद्वा, यह्व्यो नाम महत्यो नद्यः। द्विधातुजत्वात् ताः नद्यः याताश्च प्राणिभिः हुताश्च यज्ञेषु इति।

(ग) प्रयोगः – अ) *तस्य जेष्ठ्यं महिमानं वहन्तीर्हिरण्यवर्णाः परि यन्ति यह्वीः* (ऋ. – 2.35.9, सा.भा. - *... यह्वीः यह्वयः महत्यः हिरण्यवर्णाः नदीनामैतत् ...*) इति। आ) *अवर्धयन्त्सुभगं सप्त यह्वीः श्वेतं* (ऋ. – 3.1.4, सा.भा. –*सप्त सर्पणशीलाः यह्वीः यह्वयः महत्यो नद्यः सुभगं शोभनधनं...*) इति।

**3. स्वाः—** निघण्टूक्तनदीवाचकेषु स्वा एव तृतीयपदम्।[21] शब्दस्यास्य रूपसमीक्षणं तत्त्वार्थसमीक्षणं –

(क) रूपार्थसमीक्षणम् – धातुपाठे भ्वादिगणे शब्दार्थकेन स्वन्-धातुना[22] सह ड-प्रत्यययोगेन[23], स्त्रीलिङ्गे टाप्-प्रत्यययोगेन च स्वा-इति पदं निष्पन्नं जातम्।

(ख) तत्त्वार्थसमीक्षणम् – प्रवाहकाले नद्यः गर्जयन्ति शब्दयन्ति इति कृत्वा तत्र स्वाः-इति पदेन नद्यः इत्यवगम्यन्ते।

(ग) प्रयोगः – *स रायस्स्वामुप सृजा गृणानः ...* (ऋ. – 6.36.4, सा.भा. –*हे इन्द्र गृणानः स्तूयमानः सः त्वं रायः धनस्य स्वाम्। नदीनामैतत्...*) इति।

**4. सीराः** - निघण्टूक्तेषु नदीवाचकेषु सीरा एव चतुर्थपदम्।[24] इदानीं शब्दस्यास्य रूप-तत्त्वार्थसमीक्षणं –

(क) रूपार्थसमीक्षणम् – धातुपाठे स्वादिगणे क्र्यादिगणे च बन्धनवाचकेन सि-धातुना सह[25] क्रन्-प्रत्यययोगेन[26] सीर-इति पदं निष्पन्नं जातम्। क्रन्-प्रत्ययस्य र-इत्यवशिष्यते।

(ख) तत्त्वार्थसमीक्षणम् – नद्यः सेत्वादिभिः शिलादिभिर्वा वध्यन्ते इति कृत्वा तासां नदीनां सीरास्त्वमिति प्रतिपादितम्।

(ग) प्रयोगः – अ) *अहं सप्त स्रवतो धारयं वृषा द्रविल्वः पृथिव्यां सीरा अधि* (ऋ. – 10.49.9, सा.भा. – *वृषा वर्षकः अहं सप्त स्रवतः स्वरतीर्नदीः धारयम् अधारयम्। ...सीराः*

*सरणशीलाः*) इति। आ) *ऋणोरपः सीरा न स्रवन्ती* (ऋ. – 6.20.12, सा.भा. - *... अप उदकानि सीरा न नदीरिव स्रवन्तीः प्रवहन्ती ऋणो अगमयः*) इत्यादयः।

5. **स्रोत्याः** - निघण्टूक्तेषु नदीवाचकेषु स्रोत्या एव पञ्चमपदम्।[27] इदानीं शब्दस्यास्य रूपतत्त्वार्थसमीक्षणं —

(क) रूपार्थसमीक्षणम् – स्रवतीति विग्रहे गत्यर्थकेन स्रु-धातुना[28] सहौणादिकेन असुन्-प्रत्यययोगेन, तुडागमेन[29] च स्रोत-इति पदं निष्पन्नं जातम्। स्रोतोऽम्बुसरणं स्वतः इति अमरकोशः।[30] वेगेन जलवहनं स्रोत इति। स्वतः स्वयम् अम्बुनः सरणं गमनं स्रोतः इत्यन्वयः। स्रोत-शब्दस्यार्थस्तु नदी इति गीतायामुक्तम्।[31] इदानीं, *स्रोतसि भवाः* इति विग्रहे *स्रोतसो विभाषा ड्यड्ड्यौ*-इति सूत्रेण[32] *ड्यत्*-प्रत्यये कृते सति स्रोत्य-इति पदं निष्पन्नं जातम्। तस्य पदस्य बहुवचने स्रोत्याः – इति पदं सिद्धम्।

(ख) तत्त्वार्थसमीक्षणम् – स्रोतो नाम वेगेन जलवहनम्। तत्र भवाः स्थिताः स्रोत्याः नद्यः। अपि च, स्रोतोऽनुसरणाद्धि नद्यो भवन्ति। यतो हि, स्वतः स्वयम् अम्बुनः सरणं गमनं स्रोतः इति। स्रोतसि भवाः, तस्यानुसरणकारिण्यश्चेति कृत्वा स्रोत्याः –इति शब्देन नद्य इत्यवगम्यन्ते।

(ग) प्रयोगः – *नवतिं स्रोत्याः नव च स्रवन्ती* (ऋ. – 10.104.8, सा.भा. - *... नवतिं नव च नवोत्तरनवतिसंख्यकाः स्रवन्तीः प्रवहन्तीः स्रोत्याः। नदीनामैतत्।...*) इति।

6. **एन्यः** — निघण्टूक्तेषु नदीवाचकेषु एन्य एव षष्ठपदम्।[33] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः —

(क) रूपार्थसमीक्षणम् – धातुपाठे अदादिगणे गत्यर्थकेन इ-धातुना[34] सह औणादिकेनासुन्[35]-प्रत्यययोगेन, *कृदिकारात्*-इति वार्तिकेन[36] ङीष्-प्रत्यययोगे एनी, तस्य बहुवचने एन्य-इति पदं निष्पन्नं जातम्।

(ख) तत्त्वार्थसमीक्षणम् – नदीनां गमनशीलत्वं प्रसिद्धं सुविदितञ्च। वस्तुतः गमनमेव नदीनां स्वाभाविकधर्मः। अत एव यन्ति एभ्यः गमनस्वभावा हि नद्यः गम्यन्ते वा प्राणिभिः इति कृत्वा नदीनां एन्यस्त्वं प्रतिपादितम्।

(ग) प्रयोगः – अ) *... विमोचने वि यद्वर्तन्त एन्यः* (ऋ. – 5.53.7, सा.भा. - *... विमोचने मनुष्याणामध्वविमोकाय संचरन्ति तथेत्यर्थः। यत् यदा एन्यः। नदीनामैतत्। नद्यः वि वर्तन्ते विविधं संचरन्ति...*) इति। आ) *आ यत्पतन्त्येन्यः सुदुघा...* (ऋ. – 8.69.10, सा.भा. – *यत् यदा एन्यः एतवर्णाः शुभ्रवर्णा नद्यः आपतन्ति आगच्छन्ति सर्वतः प्रवहन्ति*) इति।

7. **धुनयः** — निघण्टूक्तेषु नदीवाचकेषु धुनय एव सप्तमपदम्।[37] इदानीं शब्दस्यास्य रूप-तत्त्वार्थसमीक्षणं —

(क) रूपार्थसमीक्षणम् – धातुपाठेस्वादिगणेकम्पनार्थकेन धु-धातुना[38] सह औणादिकेन नि-प्रत्यययोगेन[39] धुनि-इति पदं निष्पन्नं जातम् । तस्य बहुवचने धुनय इति रूपं सिद्धम् ।

(ख) तत्त्वार्थसमीक्षणम् – नद्यः सवेगं प्रवाहकाले नदीतीराणि वृक्षादीनि च धुन्वन्ति कम्पयन्ति, कम्पन्ते वा स्वयं गमनशीलत्वात्[40] इति कृत्वा धुनय एव नदीपदवाच्यम् ।

(ग) प्रयोगः – *पथो रदन्तीरनु जोषमस्मै दिवेदिवे धुनयो यन्त्यर्थम्* (ऋ. – 2.30.2, सा.भा. – *रदन्तीः विलिखन्त्यः धुनयः नद्यः दिवेदिवे प्रतिदिवसम्...*) इति।

8. **रुजानाः** — निघण्टूक्तेषु नदीवाचकेषु रुजाना एव अष्टमपदम्।[41] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

(क) रूपार्थसमीक्षणम् – धातुपाठे तुदादिगणे दुःखप्रदानार्थकेन रुज्-धातुना[42] सह व्यत्ययेन शानच्-प्रत्ययो भवति। तुदादिभ्यः शः – इति श-विकरणः, छान्दसः नुमभाव इति कृत्वा रुजानः, बहुवचने रुजानाः – इति पदं निष्पन्नं जातम्।

(ख) तत्त्वार्थसमीक्षणम् – वर्षासु अधिकजलप्रवाहत्वेन नद्यः स्वकूलानि रुजन्ति ध्वंसं कुर्वन्तीति कृत्वा नद्यः तानि कूलानि प्रति दुःखदायकाः भवन्ति। देवयज्वा अपि उवाच– *रुजन्तिकूलानि*[43] इति। ऋग्वेदभाष्यकारेण सायणाचार्येणापि आम्नातम्[44]– *रुजन्ति कूलानीति रुजानाः नद्यः। रुजाना नद्यो भवन्ति रुजन्ति कूलानि (नि. – 6.4) इति यास्कः* इति।

(ग) प्रयोगः – *... वधानां सं रुजानाः पिपिष इन्द्रशत्रुः* (ऋ. – 1.32.6, सा.भा. - *... वृत्रः इन्द्रेण हतो नदीषु पतितः सन् रुजानाः नदीः सं पिपिषे सम्यक् पिष्टवान्*) इति।

9. **वक्षणाः** – निघण्टूक्तेषु नदीवाचकेषु वक्षणा एव नवमपदम् ।[45] इदानीं शब्दस्यास्य रूप-तत्त्वार्थसमीक्षणं –

(क) रूपार्थसमीक्षणम् – धातुपाठे भ्वादिगणे रोषवाचकार्थकेन वक्ष्-धातुना[46] सह युच्-प्रत्यययोगेन,[47] च्-इत्यस्य इत्,[48] यु-स्थाने अनः,[49] णत्वहेतु[50] वक्षणः, बहुवचने वक्षणाः इति सिद्धम्।

(ख) तत्त्वार्थसमीक्षणम् – वर्षासु नद्यः वेगेन प्रवहति, वृक्षलतागुल्मादीन् नदीतीरान् च हिंसन्ति इति कृत्वा तासां रोषं प्रकाशयन्ति। यद्वा वक्षतिः प्राप्तिकर्मणः स्यात् – इति माधवः।[51] तत्रापि युच्-प्रत्ययो भवति। अर्थस्तु प्राणिभिः ताः प्राप्यन्ते। अपि च, ताः स्वयमेव समुद्रं निम्नप्रदेशं वा प्राप्नुवन्ति इति। रोषप्रकाशनार्थं प्राप्तिकर्मार्थं च तासां नदीनां वक्षणास्त्वम् इति प्रतिपादितम्।

(ग) प्रयोगः – *अहन्नहिमन्वपस्ततर्द प्र वक्षणा अभिनत्पर्वतानाम्* (ऋ. – 1.31.1, सा.भा. - *... पर्वतानां सम्बन्धिनीः वक्षणाः प्रवहणशीलाः नदीः प्र अभिनत् भिन्नवान् कूलद्वयकर्षणेन प्रवाहितवानित्यर्थः...*) इति।

10. **स्वादो अर्णाः** — निघण्टूक्तेषु नदीवाचकेषु स्वादो अर्णा एव दशमपदम्।[52] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

(क) रूपार्थसमीक्षणम् – धातुपाठे भ्वादिगणे आत्मनेपदीना आस्वादनार्थकेन स्वाद्-धातुना[53] सह

असुन्-प्रत्यययोगेन[54] स्वाद्-शब्दो निष्पद्यते। स्वादः भक्ष्यमाणः[55] इति।

(ख) तत्त्वार्थसमीक्षणम् – भक्षणेन चात्र वाधनं लक्ष्यते, तेन कूलं वाधमानोऽर्णो जलं यासामिति स्वादो अर्णः, वेगवज्जलमित्यर्थः। स्वादो अर्णा जलान्विताः।[56] स्वादो वेगवज्जलं यासां ताः भक्षितकूलोदकाः।[57] स्वादुजलेन परिपूर्णत्वान्नद्याः स्वादो अर्णत्वं सिद्धम् ।

*(ग)* प्रयोगः – *धन्वर्णसो नद्यः१ स्वादो अर्णाः स्थूणेव सुमिता दृंहत द्यौः* (ऋ. – 5.45.2, सा.भा. – *नद्यः च धन्वर्णसः। ... स्वादोअर्णाः भक्षितकूलोदकाः। कुलंकषा इत्यर्थः। नद्यश्चैवंरूपा भवन्ति*) इति।

11. **रोधचक्राः** — निघण्टूक्तेषु नदीवाचकेषु रोधचक्रा एव एकादशतमपदम्।[58] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

(क) रूपार्थसमीक्षणम् – धातुपाठे रुधादिगणे वाधाप्रदानार्थकेन रुध्-धातुना[59] सह घञ्-प्रत्यययोगेन रोध-शब्दो निष्पद्यते। क्रियतेऽनेनेति विग्रहे कृ-धातुना[60] सह घञर्थे क-प्रत्ययः, *कृञादीनां के द्वे भवतः* इति द्वित्वे कृते सति चक्र-इति पदं निष्पद्यते।

(ख) तत्त्वार्थसमीक्षणम् – रोधः नदीतीरम्। चक्रं करणम्। रोधस्य निरोधस्य चक्रं करणं कृतिरासां विद्यते इति रोधचक्राः।[61] नद्यः खलु वृष्ट्या बहूदकद्वारेण प्राणिनां गतिः निवारयन्ति, वाधाप्रदानं कुर्वन्ति इत्यर्थः। नदीतीरेण नद्यः जलप्रवाहमपि निवारयति। यद्वा, रोधः तीरं तस्य करणं निर्माणमासां विद्यते तीरवत्यो हि नद्यः। स्वतीरेण वाधाप्रदानाय रोधचक्राः इति शब्देन नदीत्यवगम्यते।

(ग) प्रयोगः – *सं यं स्तुभोऽवनयो न यन्ति समुद्रं न स्रवतो रोधचक्रा* (ऋ. – 1.190.7, सा.भा. - *... अवनयो भूमयो मनुष्या यथा स्वामिनं कर्म प्रति वा सं यन्ति संगच्छन्ति तद्वत् तथा समुद्रं रोधचक्राः। नदीनामैतत्। रोधनशिलानि चक्राणि यासु तास्ताद्दश्यः कूलं क्रममाणाः वा स्रवतः स्रवन्त्यो नद्यो यथा यन्ति तद्वत् ...*) इति।

12. **हरितः** — निघण्टूक्तेषु नदीवाचकेषु हरित एव द्वादशतमपदम्।[62] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

(क) रूपार्थसमीक्षणम् – धातुपाठे भ्वादिगणे हरणार्थकेन हृ-धातुना[63] सह औणादिकेन इतन्-प्रत्यययोगेन[64] हरितः-इति शब्दो निष्पद्यते।

(ख) तत्त्वार्थसमीक्षणम् – नदी स्ववेगेन प्रवाहकाले लतागुल्मवृक्षादीन् हरन्ति इति तस्याः नद्याः हरितत्वम्।[65]

13. **सरितः** — निघण्टूक्तेषु नदीवाचकेषु सरित एव त्रयोदशतमपदम्।[66] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः —

(क) रूपार्थसमीक्षणम् – धातुपाठेभ्वादिगणे गत्यर्थकेन सृ-धातुना[67] सह औणादिकेन इतन्-प्रत्यययोगेन[68] सरितः-इति शब्दो निष्पद्यते।

(ख) तत्त्वार्थसमीक्षणम् – स्रवन्ति गच्छन्ति इति सरितः। नदी सर्वदा प्रवहतीति अस्माभिर्ज्ञायते।

सर्वदा गमनशीलत्वात् सरित-इति पदेन नदी इत्यवगम्यते।

(ग) प्रयोगः – *सम्यक्स्रवन्ति सरितो न धेना ...* (ऋ. – 4.58.6, सा.भा. - *...सम्यक् स्रवन्ति क्षरन्ति ... सरितो न ...*) इति।

14. **अग्रुवः —** निघण्टूक्तेषु नदीवाचकेषु अग्रुव एव चतुर्दशतमपदम्।[69] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

(क) रूपार्थसमीक्षणम् – धातुपाठे भ्वादिगणे गत्यर्थकात् अह्-धातुना[70] सह रु-प्रत्ययान्तेषु[71] निपातितेषु द्रष्टव्योऽयं शब्दः। निपातनान्नलोपः। *तन्वादीनां छन्दसि बहुलम्* इति वार्तिकेण[72] उवङादेशे अग्रुव-इति पदं निष्पद्यते।

(ख) तत्त्वार्थसमीक्षणम् – अग्रुवो गमनात् नद्यः इति माधवः।[73] नद्यः गच्छन्ति तान् तान् प्रदेशान् स्ववेगेन इति कृत्वा गमनार्थकेन अह्-धातोः निष्पन्नेन अग्रुव-इति शब्देन नदीवाचकत्वं प्रतिपादितम्।

(ग) प्रयोगः – अ) *त्रि सप्त मयुर्यः सप्त स्वसारे अग्रुवः तास्ते ...* (ऋ. – 1.191.14, सा.भा. - *... सप्त एतत् संख्यकाः सर्पणस्वभावाः स्वसारः स्वयमेव सरणाः अग्रुवः। नदीनामैतत्। सुरगङ्गाद्याः प्रसिद्धाः सप्त नद्यः सन्ति...*) इति। आ) *प्राग्रुवो नभन्वो३ न वक्ता ध्वस्रा अपिन्वद् ...* (ऋ. – 4.19.7, सा.भा. - *... अग्रुवः। अग्रुव इति नदीनामैतत्। अग्रगामिनीः नदी प्र अपिन्वत् प्रकर्षेणापूरयत्...*) इति। इ) *... न मातरा रिहाणे समग्रुवो न ...* (ऋ. – 7.2.5, सा.भा. - *... अग्रुवो न यथा नद्यः क्षेत्राण्युदकेन तद्वत्...*) इति।

15. **नभन्वः —** निघण्टूक्तेषु नदीवाचकेषु नभन्व एव पञ्चदशतमपदम्।[74] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

(क) रूपार्थसमीक्षणम् – धातुपाठे दिवादिगणे[75] क्र्यादिगणे[76] च ध्वंसार्थकेन तथा हिंसार्थकेन परस्मैपदीना नभ्-धातुना सह नु-प्रत्ययः[77], बाहुलकात् नुप्रत्यये नकार उपजनः। नभन्ते, नभ्यन्ति, नभ्नन्ति इति नभन्वः।

(ख) तत्त्वार्थसमीक्षणम् – नद्यो हि बाधिकाः कुलादीनाम्। नद्यः सवेगं प्रवाहकाले यथा वृक्षलतागुल्मादीन् हरन्ति तथा हिंसन्ति, तथा नदीतीरमपि हिंसन्ति तथा ध्वंसं कुर्वन्ति। तदर्थं ध्वंसार्थकेन हिंसार्थकेन वा नभ्-धातोः निष्पन्नेन नभन्वः-इति शब्देन नद्यः इत्यवगम्यन्ते।

16. **वध्वः —** निघण्टूक्तेषु नदीवाचकेषु वध्व एव षोडशतमपदम्।[78] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

(क) रूपार्थसमीक्षणम् – भ्वादिगणे प्रवाहार्थकेन वह्-धातुना[79] सह ऊ-प्रत्यययोगेन, ह-कारस्य ध -कारेण[80] वधू-इति पदं निष्पद्यते । बहुवचने वध्वः – इति रूपं निष्पन्नं जातम्।

(ख) तत्त्वार्थसमीक्षणम् – वहन्ति संसारभारं उह्यते भर्त्रादिभिरिति वध्वः। अथवा नद्यः भूम्यां वहन्ति। अथवा नदी एव समुद्रस्य भार्या। उच्यते – सरित्पतिर्हि समुद्रः। समुद्रस्य भार्याहेतु

नद्यो वध्व इत्युच्यन्ते।

17. **हिरण्यवर्णाः** — निघण्टूक्तेषु नदीवाचकेषु हिरण्यवर्णा एव सप्तदशतमपदम्।[81] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

(क) रूपार्थसमीक्षणम् – हर्यति दीप्यते इति विग्रहे गत्यर्थकेन कान्त्यर्थकेन हर्य्-धातुना[82] सह कन्यन्-प्रत्ययेन धातोः हिरादेशे[83] च हिरण्य-इति रूपं सिद्धम्। भ्वादिगणे वरणार्थकेन वृञ्-धातुना[84] सह रन्-प्रत्यययोगेन[85] वर्ण-इति पदं निष्पद्यते।

(ख) तत्त्वार्थसमीक्षणम् – वृणोति व्रियते वा असौ इति वर्णः श्वेतादि इति। हिरण्यः शुभ्र कान्त इष्टो वर्णो यासां ताः।[86] अथवा हिताः निदाघे घर्मादौ रमणीयाः मनःप्रह्लादजनयित्र्यः ताः नद्यः। अपि च, तापादेर्भूम्या वारिकाश्च ता नद्यः।[87] नदीनां जलं हिरण्यवच्छुभ्रं भवति। तेषामेव जलानां धारकाः नद्यः हिरण्यवर्णाः —इति शब्देन परिचीयन्ते इति तासां नदीनां हिरण्यवर्णत्वं निष्पादितम्।

18. **रोहितः** — निघण्टूक्तेषु नदीवाचकेषु रोहित एव अष्टादशतमपदम्।[88] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

(क) रूपार्थसमीक्षणम्–धातुपाठे भ्वादिगणे बीजादुत्पादनार्थकेन रुह्-धातुना[89] सह औणादिकेन इति-प्रत्यय-योगेन,[90] रुह्-धातोः उकारस्य ओकारे सति रोहित-इति पदं निष्पन्नं जातम्।

(ख) तत्त्वार्थसमीक्षणम्–नदीस्थितेन जलेन शस्यबीजानि फलबीजानि चेति प्ररोहन्ति, बीजाद्बहिर्निर्गच्छन्ति इति कृत्वा तस्यः रोहितस्य नदीवाचकत्वं प्रतिपादितम्। *रोहन्त्याभिर्बीजानि, तज्जलेन हि बीजानि प्ररोहन्ति*[91] इति।

19. **सस्रुतः** — निघण्टूक्तेषु नदीवाचकेषु सस्रुत एव ऊनविंशतितमपदम्।[92] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

(क) रूपार्थसमीक्षणम् – धातुपाठे भ्वादिगणे गत्यर्थकेन सम्पूर्वकात् स्रु-धातुना[93] सह क्विप्-प्रत्यययोगेन[94] च सस्रुत-इति पदं निष्पादितम्। सङ्गताः संमिलिताः इति सस्रुतः।[95]

(ख) तत्त्वार्थसमीक्षणम् – क्षुद्रनद्यो महानद्यश्च परस्परं सङ्गताः संमिलिताः भवन्ति। अत एव सस्रुत इत्युच्यन्ते। यद्वा, स्रवणं स्रुतजलप्रवाहः स्रोत इत्यर्थः। स्रोतेण सह वर्तन्ते इति सस्रुतः। *सस्रुतः स्रोतसा युक्ताः* – इति च माधवः।[96] अतएव संगतत्वात्, स्रोतेण सह वर्तमानत्वात् तासां नदीनां सस्रुतस्त्वम्।

20. **अर्णाः** — निघण्टूक्तेषु नदीवाचकेषु अर्णा एव विंशतितमपदम्।[97] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

(क) रूपार्थसमीक्षणम् – धातुपाठेतनादिगणे गत्यर्थकेन उभयपदिना ऋण-धातुना[98] सह अच्-प्रत्यययोगेन[99] अर्ण-इति पदं निष्पन्नम्। अथवा ऋण-धातुना सह अच्-प्रत्यययोगेन, अर्तेः असुन्-प्रत्ययो[100] विहितो, बाहुलकात् नुडागमो च भवति इति कृत्वा अर्ण-इति पदं निष्पन्नं जातम्। बहुवचने अर्णाः – इत्येवं भवति।

(ख) तत्त्वार्थसमीक्षणम् – अर्णन्ति गच्छन्ति इति अर्णाः।[101] नदीनां सदा गमनशीलत्वं सर्वैरेव विज्ञायते इति कृत्वा अर्णाः-इति शब्दस्य नदीवाचकत्वं प्रतिपादितम्।

(ग) प्रयोगः – *ऋणोरपो अनवद्यार्णा यूणे वृत्रं...* (ऋ. – 1.174.2, सा.भा. - *... हे इन्द्र अर्णाः अरणशीलाः अपः तदीयदुर्गस्थानानि उदकाश्रयाणि तटकादीन् ऋणोः ...*) इति।

21. **सिन्धवः —** निघण्टूक्तेषु नदीवाचकेषु सिन्धव एव एकविंशतितमपदम्।[102] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

(क) रूपार्थसमीक्षणम् – धातुपाठेभ्वादिगणे निम्नप्रदेशे पतनार्थकेन क्षरणार्थकेन आत्मपदिना स्यन्द्-धातुना[103] सह उ-प्रत्यययोगेन[104], द-कारस्य धकारादेशेन च सिन्धु-इति पदं निष्पन्नं जातम्। स्त्रीलिङ्गवाचकेन शब्देनानेन नदविशेषः अवगम्यते। पदस्यैतस्य बहुवचने सिन्धवः – इत्येवं भवति।

(ख) तत्त्वार्थसमीक्षणम् – नदी पर्तवात् प्रस्रवणरूपेण निम्ने पतति क्षरतीति कृत्वा तस्याः सिन्धुत्वं प्रतिपादितम्। स्यन्दन्ते इत्यर्थः इति देवयज्वा।[105]

(ग) प्रयोगः – अ) *तस्मा इद्विश्वे धुनयन्त सिन्धवोऽच्छिद्रा शर्म...* (ऋ. – 2.25.5, सा.भा. - *...विश्वे सिन्धवः सर्वा स्यन्दनशीला नद्यः धुनयन्त चलयन्ति...*) इति। आ) *ऋतं सिन्धवो वरुणस्य यन्ति ...* (ऋ. – 2.28.4, सा.भा. - *... ऋतेन सिन्धवः स्यन्दशीला नद्यः यन्ति गच्छन्ति...*) इत्यादयः।

22. **कुल्याः —** निघण्टूक्तेषु नदीवाचकेषु कुल्या एव द्वाविंशतितमपदम्।[106] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः —

(क) रूपार्थसमीक्षणम् – धातुपाठे भ्वादिगणे संग्रहार्थकेन कुल्-धातुना[107] सह यत्-प्रत्यय-योगेन[108] कुल्य-इति पदं निष्पादितम्। कोलन्ति संस्त्यायन्ति अस्मिन् शिलादय इति कुलं पर्वतः।

(ख) तत्त्वार्थसमीक्षणम् – कुलं नाम पर्तम इति सिद्धम्। तत्र कुले प्रधानभूते पर्वते भवाः स्थिताः इति कुल्याः।[109] यद्वा मेघस्य पर्वतस्य वा समुच्छ्रिते प्रदेशे कुले भवन्तीति कुल्याः।[110] अथवा अमरकोशानुसारेण कुल्या नाम कृत्रिमा नदीविशेषः।[111] कुले प्राणिगणे साधुः *तत्र साधुः*-इति सूत्रेण[112] यत्-प्रत्ययेन कुल्या-इति पदं निष्पादितम्। अभिज्ञानशकुन्तलायामपि[113] कुल्या नाम कृत्रिमा नदीविशेषः तथा पयःप्रणाली इति। अत एव नदी-शब्दस्य कुल्यात्वं प्रतिपादितम्।

(ग) प्रयोगः – अ) *... स्यन्दतां कुल्या विषिताः पुरस्तात्* (ऋ. – 5.83.8, सा.भा. - *... कुल्याः नद्यः विषिताः विष्यूताः सत्यः स्यन्दन्तां...*) इति। आ) *...धेनवो यथा ह्रदं कुल्या इवाशत* (ऋ. – 3.45.3, सा.भा. - *... ते च सोमाः कुल्या इव कृत्रिमसरितः...*) इत्यादयः।

23. **वर्यः —** निघण्टूक्तेषु नदीवाचकेषु वर्य एव त्रयोविंशतितमपदम्।[114] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

(क) रूपार्थसमीक्षणम् – धातुपाठे स्वादिगणीये वरणार्थकात् वृञ्-धातुना[115] सह इ-प्रत्यययोगेन[116] वर-इति निष्पादितम्। *कृदिकारात्*-इति वार्तिकेन[117] ङीष्-प्रत्यययोगे वरी-इति पदं निष्पन्नं जातम्। पदस्यैतस्य बहुवचने वर्यः-इत्येवं भवति। अथवा क्र्यादिगणीये सम्भजनार्थकेन सेवार्थकेन वृङ्-धातुना सह इ-प्रत्यययोगेनापि वर-इति पदं निष्पादितम्। *कृदिकारात्*-इति वार्तिकेन ङीप्-प्रत्यययोगे वरी-इति पदं निष्पन्नं जातम्। पदस्यैतस्य बहुवचने वर्यः-इत्येवं भवति।

(ख) तत्त्वार्थसमीक्षणम् – इन्द्रेण वृतत्वाद् जलस्य वरणीयत्वम्। जलस्य वरणीयत्वं वैदिके लौकिके च प्रसिद्धम्। तस्योदकस्य धारकत्वात् नदीनां वर्यस्त्वं प्रसिद्धम्। अपि च, नदी तस्याः जलेन प्राणिनः सेवते, तत्परिपालनाय तत्परिपोषणाय च नदी तस्याः जलं प्रददाति इति कृत्वा तस्याः नद्याः वर्यस्त्वं प्रतिपादितम् ।

24. **उर्व्यः** — निघण्टूक्तेषु नदीवाचकेषु उर्व्य एव चतुर्विंशतितमपदम्।[118] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

(क) रूपार्थसमीक्षणम् – धातुपाठे अदादीगणीये आच्छादनार्थकेन[119] ऊर्णु-धातुना सह *महति ह्रस्वश्च*-इति सूत्रेण[120] उ-प्रत्ययो णलोपो ह्रस्वश्च कृत्वा उरुः- इति पदं निष्पन्नं जातम्। *वोतोगुणवचनात्*– इति सूत्रेण[121] ङीष्-इति प्रत्ययेन उर्वी-इति पदं निष्पद्यते।

(ख) तत्त्वार्थसमीक्षणम् – ऊर्णोति आच्छादयतीति उर्वी।[122] अधिकवर्षणत्वात्महत्योः नद्यः स्वोदकेन विस्तीर्णं भूमिमाच्छादयन् तीति[123] कृत्वा नदीनाम् उर्व्यस्त्वं प्रसिद्धं प्रतिपादितञ्च।

25. **इरावत्यः** – निघण्टूक्तेषु नदीवाचकेषु इरावत्यः एव पञ्चविंशतितमपदम्।[124] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

(क) रूपार्थसमीक्षणम् – धातुपाठे अदादिगणे गत्यर्थकात् इ-धातुना[125] सह र-प्रत्यययोगेन, टाप्-प्रत्यययोगेन, निपातनात् गुणाभावे इरा-इति पदं निष्पन्नं जातम्। इरा-शब्देन सह मतुप्-प्रत्ययेन, म-कारस्य व-कारेण इरावती-इति रूपं सिद्धम्।

(ख) तत्त्वार्थसमीक्षणम् – इरा नाम जलम्।[126] अतएव नदी खलु जलवती इरावती इति कृत्वा तस्याः नद्याः इरावतीत्वं प्रसिद्धम्।

(ग) प्रयोगः – *इरावतीर्वरुण धेनवो वां मधुमद्वां सिन्धवो मित्र दुह्रे* (ऋ. – 5.69.2, सा.भा. - *...इरावती। इरा क्षीरलक्षणा । तद्वित्यो...*) इति।

26. **पार्वत्यः** – निघण्टूक्तेषु नदीवाचकेषु पार्वत्य एव षड्विंशतितमपदम्।[127] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

(क) रूपार्थसमीक्षणम् – पर्वति पूरयतीति पूरणार्थकेन पर्व-धातुना[128] सह औणादिकेन अतच्-प्रत्यये[129] कृते सति पर्वत-इति रूपं निष्पन्नम्। पर्वतो हिमाचलस्तस्य तदधिष्ठातृदेवस्येति भाव अपत्यमिति अण्-प्रत्यये पार्वतः इति स्थितम्। तदनन्तरं ङीप्-प्रत्ययेन पार्वती, तस्य शब्दस्य बहुवचने पार्वत्यः- इति रूपं निष्पन्नं जातम्।

(ख) तत्त्वार्थसमीक्षणम् – अतिवर्षणादनन्तरं नदी पर्वति पूरयति जलेन भूमिं इति कृत्वा पार्वत्यः – शब्दस्य नदीवाचकत्वं प्रतिपादितम्।

27. **स्रवन्त्यः** – निघण्टूक्तेषु नदीवाचकेषु स्रवन्त्यः एव सप्तविंशतितमपदम्।[130] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

(क) रूपार्थसमीक्षणम् – भ्वादिगणे गत्यर्थकात् स्रु-धातोः शतृ-प्रत्यययोगेन, ङीप्-प्रत्यययोगेन च स्रवन्ती-इति पदं निष्पन्नं जातम्। स्रवन्ती नाम नदी इत्यमरकोशः।[131]

(ख) तत्त्वार्थसमीक्षणम् – नदी एव सर्वदा गमनस्वभावयुक्ता।[132] अतएव गत्यर्थकात् स्रु-धातु-निष्पन्नस्य स्रवन्ती-इति पदस्य नदीवाचकत्वं प्रतिपादितम् सर्वदा गमनशीलत्वात्।

28. **ऊर्जस्वत्यः** — निघण्टूक्तेषु नदीवाचकेषु ऊर्जस्वत्य एव अष्टाविंशतितमपदम् ।[133] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

(क) रूपार्थसमीक्षणम् – धातुपाठे चुरादिगणीये परस्मैपदिना बलवाचकेन ऊर्ज-धातुना[134] सह औणादिकेन असुन्-प्रत्यय-योगेन[135]पयः-इति निष्पद्यते। ऊर्जयतीत्यूर्जो वलं तेन तद्वत्यः। *अस्मायामेधास्रजो विनिः*[136] इति सूत्रेण मत्यर्थे विनि-प्रत्ययः। *बहुलं छन्दसि* इति सूत्रेण[137] मतुप्-प्रत्ययः। *तसौ मत्वर्थे* इति सूत्रेण[138] तकारान्तत्वात् ऊर्जस्वत्-इति पदस्य भ-संज्ञा। ऊर्जस्वत् – इत्यस्य स्त्रीलिङ्गे ऊर्जस्वती, प्रथमायाः बहुवचने ऊर्जस्वत्यः इति।

(ख) तत्त्वार्थसमीक्षणम् – ऊर्जो नाम बलम्। नदी एव वेगवती बलवती चेति। बलवत्यो नद्यः प्रवाहकाले स्ववेगेन तटस्थितान् स्थिरान् वृक्षादीन् प्रवाहयन्ति हरन्ति[139] इति तासां नदीनां बलवन्तत्वम् ऊर्जस्वत्यस्त्वम्।

29. **पयस्वत्यः** – निघण्टूक्तेषु नदीवाचकेषु पयस्वत्य एव ऊनत्रिंशत्तमपदम्।[140] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

(क) रूपार्थसमीक्षणम् – धातुपाठे भ्वादिगणे पानार्थकात् पा-धातोः[141]औणादिकेन असुन्-प्रत्यय-योगेन[142]पयः-इति निष्पद्यते। पीयत इति पयः। *अस्मायामेधास्रजो विनिः*– इति सूत्रेण[143] मतुप्-प्रत्ययः, *बहुलं छन्दसि*– इति सूत्रेण[144] मकारस्य वकारत्वम्, *उगितश्च*-इति सूत्रेण[145] ङीप्-प्रत्ययः। *तसौ मत्वर्थे* – इति सूत्रेण[146] भसंज्ञाविधानात् रुत्वं न भवति। अतएव पीयते इति रूपं निष्पन्नम्।

(ख) तत्त्वार्थसमीक्षणम् – पयोऽस्या अस्तीति पयस्वती। नदी खलु पयःस्वती। पयःपानेन तथा पयःग्रहणेन न केवलं प्राणिनः अपि तु वृक्षा अपि वर्धन्ते इति पयः। उदकं तद्वत्यः[147] इति पयस्वत्यः।

(ग) प्रयोगः – अ) *सा नः पयस्वती दुहामुत्तरामुत्तरां समां* (ऋ. – 4.57.7, सा.भा. – *सा द्यौः पयस्वत्युदकवती दुहां...*) इति। आ) *असश्चंती भूरिधारे पयस्वती घृतं...* (ऋ. – 6.70.2, सा.भा. - *... पयस्वती उदकवत्यौ...*) इत्यादयः।

30. **सरस्वत्यः** – निघण्टूक्तेषु नदीवाचकेषु सरस्वत्य एव त्रिंशत्तमपदम्।[148] इदानीं

शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

(क) रूपार्थसमीक्षणम् – स्त्रीलिङ्गवाचकः शब्दोऽयं सरो नीरं तद्वत् रसो वास्त्यस्या इति विग्रहे सरस्-शब्देन सह मतुप्-प्रत्यययोगेन, मकारस्य वकारकृते सति निष्पन्नो जातः। सरशब्दस्य गतिवाचकत्वं प्रसिद्धम्। शब्दोऽयं धातुपाठे दशगणेषु भ्वादिगणान्तर्गतेन सृ[149]-धातुना सह औणादिकासुन्[150]-प्रत्ययेन निष्पन्नः। सरति स्त्रियते गच्छतीति वा सरः।[151] सरो नाम जलम्।[152] जलस्य गतिवाचकत्वं सर्वैव सर्वत्रैव प्रसिद्धम् ।

(ख) तत्त्वार्थसमीक्षणम् – वैदिकसाहित्येसरस्वती-शब्दोद्विविधार्थबोधकः। शब्देनानेन देवी नदी चावगम्येते। *इयं शुष्मेभिर्विसखा इवारुजत्*[153] इति मन्त्रे सरस्वती नदीरूपा। मन्त्रेऽस्मिन् ऊर्मिभिः पारावतघ्नीं इति शब्दद्वयं तस्याः सरस्वत्याः नदीरूपत्वं सूचयति। सर-शब्दस्यार्थो जलमिति पूर्वोल्लिखितः। नदीषु जलमस्तीति कृत्वा जलस्य गतिवाचकत्वं, जलस्थिताभिः ऊर्मिभिः पारावतघ्नत्वमपि सर्वैर्विज्ञातम्। अत एव सर उदकम्। तदभीक्ष्णं सरति गच्छतीति, तेन विशिष्टेन सरसा जलेन तद्वती सरस्वतीति। सरसत्वात् उदकवत्वात् सरस्वती-इति शब्दो नदीवाचकेषु पठित इति आशयः।

(ग) प्रयोगः – अ) *इयं शुष्मेभिर्विसखा इवारुजत्सानु* ... (ऋ. – 6.61.2, सा.भा. – *इयं नदीरूपा सरस्वती शुष्मैः शोषकैरात्मीयैर्बलैस्तविषेभिर्महद्भिरुर्मिभिस्तरङ्गैः गिरीणां पर्वतानां तीरसंबद्धानां सानु सानून्यरूजत्*) इति। आ) ...सप्तधातुः...वाजेवाजे हव्या भूत् (ऋ. – 6.61.12, सा.भा. - ... सप्तधातवोऽवयवा गायत्र्याद्या गङ्गाद्या वा... ईदृशी सरस्वती वाजेवाजे युद्धे युद्धे सर्वेषु युद्धेषु हव्या भूत्। ह्वातव्या भवति।) इत्यादयः।

31. **तरस्वत्यः** – निघण्टूक्तेषु नदीवाचकेषु तरस्वत्य एव एकत्रिंशत्तमपदम्।[154] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

(क) रूपार्थसमीक्षणम् – धातुपाठे भ्वादिगणे प्लवन-सन्तरण-वाचकेन तॄ-धातुना[155] सह औणादिकेन असुन्-प्रत्यय-योगेन[156] तरः-इति निष्पद्यते। तरो नाम बलम्।[157] तरो बलं वेगो वा अस्ति अस्य इति मतुप्, मस्य व-इति कृत्वा तरस्वत्, स्त्रीलिङ्गे तरस्वती, प्रथमायाः बहुवचने तरस्वत्यः – इति रूपं निष्पन्नं जातम्।

(ख) तत्त्वार्थसमीक्षणम् – तरन्ति अनेन अपदमिति तरो बलं तद्वत्यः[158] इति। नद्यः बलेन वेगेन वा प्रवाहकाले वर्जं प्रवाहयन्तीति तासां नदीनां तरस्वत्यस्त्वमिति।

32. **हरस्वत्यः** – निघण्टूक्तेषु नदीवाचकेषु हरस्वत्य एव द्वात्रिंशत्तमपदम्।[159] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

(क) रूपार्थसमीक्षमम् – धातुपाठे भ्वादिगणे हरणार्थकात् हृञ्-धातुना[160] सह औणादिकेन असुन्-प्रत्यय-योगेन[161] हर-इति निष्पद्यते। हरः – इत्येतदनेकार्थम्। तद्यथा –*ह्रियतो प्राणिभिः, हरति वा स्नेहं दशयाभ्यन्तरस्थया, हरति वा तम इति हर इत्युच्यते, उदकं ह्रियते प्राणिभिर्जीवनाय इति हर इत्युच्यते* इति।[162]

(ख) तत्त्वार्थसमीक्षणम् – जलं खलु प्राणिभिः तज्जीवनाय तदुपभोगाय ह्रियते इति। नदी एव जलधारका। अतएव जलधारकत्वात् तज्जलस्य हरणत्वात् नदी एव हरस्वती-शब्देनोच्यते। हरस्वती-इत्यस्य शब्दस्य बहुवचने हरस्वत्यः इति रूपं जातम्।

(ग) प्रयोगः – *...स्वां तं ममर्तु दच्छुना हरस्वती* (ऋ. – 2.23.6, सा.भा. - *... तं स्वा स्वीया दुच्छुना दुर्बुद्धिर्हरस्वती वेगवती सती मर्मर्तु...*) इति।

33. **रोधस्वत्यः** – निघण्टूक्तेषु नदीवाचकेषु रोधस्वत्य एव त्रयस्त्रिंशत्तमपदम्।[163] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

(क) रूपार्थसमीक्षणम् – धातुपाठे रुधादिगणे रुध्यर्थकात् रुध्-धातुना[164] सह औणादिकेन असुन्-प्रत्यय-योगेन[165] रोधः-इति निष्पद्यते। रोधसा तीरेण, तद्वत्यः[166] इति।

(ख) तत्त्वार्थसमीक्षणम् – रुणद्धि स्रोतः इति रोधः कूलम्। रोधः कूलं निरुणद्धि स्रोतः इति। नदीजलं तथा नदी तीरेण कूलेन रुणद्धि वाधाप्राप्तं भवति इति कृत्वा रोधस्वती नाम नदी, तस्याः बहुवचने रोधस्वत्यः इति।

(ग) प्रयोगः – *मरुतो वीळुपाणिभिश्चित्रा रोधस्वतीरनु* (ऋ. – 1.38.11, सा.भा. - *... रोधस्वतीरनु कूलयुक्ता नदीरनुलक्ष्य ...*) इति।

34. **भास्वत्यः** – निघण्टूक्तेषु नदीवाचकेषु भास्वत्य एव चतुस्त्रिंशत्तमपदम्।[167] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

(क) रूपार्थसमीक्षणम् – अदादिगणे दीप्त्यर्थकात् भा-धातुना[168] सह क्विप्रत्यय-योगेन भास-शब्दो निष्पद्यते। भास्वती-शब्दो निष्पद्यते। भासा, तद्वती भास्वती। *तसौ मत्वर्थे* – इति सूत्रेण[169] भसंज्ञाविधानात् रुत्वं न भवति। तस्य बहुवचने भास्वत्यः – इति रूपं सिद्धम्। भात्येव स्वया दीप्त्या इति भास्वती।

(ख) तत्त्वार्थसमीक्षणम् – भा नाम दीप्तिः,[170] तद्वत्यः दीप्तिमत्यः[171] भास्वत्यः इति हि नद्यः। उदकस्य शुक्लवर्णत्वात्तस्य नित्यभास्वरत्वं प्रकाशितम्। तस्योदकस्य आधारभूता नदी एव भाति दीप्यते इति कृत्वा भास्वत्यः – इति पदेन नद्यः अवगम्यन्ते।

35. **अजिराः** – निघण्टूक्तेषु नदीवाचकेषु अजिरा एव पञ्चत्रिंशत्तमपदम्।[172] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

(क) रूपार्थसमीक्षणम् – भ्वादिगणे गमनार्थकेन परस्मैपदिना अज-धातुना[173] सह औणादिक-किरच्-प्रत्यय-योगेन[174] अजिरा-इति निष्पद्यते।

(ख) तत्त्वार्थसमीक्षणम् – अजन्ति गच्छन्ति क्षिप्यन्ते प्रेर्यन्ते नावः इति अजिरा।[175] नद्यः गच्छन्ति, अजन्ति इति यावत्। यद्वा, अजिरम् – इति क्षिप्रनाम[176], अजिराः शीघ्रगाः[177] इति। नावोऽपि ताभिः नदीभिः क्षिप्रेण प्रेरयिताः इति तासां नदीनां अजिरत्वम् इति।

(ग) प्रयोगः – *आशुं दूतमजिरं प्रत्नमीड्यं...* (ऋ. -3.9.8, सा.भा. - *... देवानां दूतम् अजिरं क्षिप्रं गन्तारं प्रत्नं पुरातनम्...*) इति।

**36. मातरः –** निघण्टूक्तेषु नदीवाचकेषु मातर एव षड्विंशत्तमपदम्।[178] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

(क) रूपार्थसमीक्षणम् – अदादिगणे परस्मैपदिना मा-धातुना[179] सह तृन्-प्रत्यय-योगेन[180] मातृ-इति निष्पद्यते। प्रातिपदिकस्यास्य प्रथमायाः बहुवचने मातरः– इति स्थितम्। न षट्स्वस्रादिभ्यः – इति सूत्रेण[181] षट्संज्ञाकेभ्यः स्वस्रादिभ्यश्च प्रातिपदिकेभ्यो स्त्रीप्रत्ययो न भवतीति कृत्वा अत्र ङीप् प्रतिषेधो विहितः।

(ख) तत्त्वार्थसमीक्षणम् – प्रजापतिना सा निर्मीयते। आसृष्टेः परमब्रह्मकैवासीत्। तस्मादेव जगदुत्पत्तिः श्रीमद्भगवद्गीतायामुक्तम् - *अहं कृत्स्नस्य जगतः प्रभवः..*[182]*,मयि सर्वमिदं प्रोतं*[183]... इत्यादयः। अतएव जलं तदाधारभूता नदी च तस्मात्परब्रह्मणरुत्पन्ना। सा नदी एव मातृवल्लोकस्य रक्षिका, यतो हि नदीमातृको देशोऽयमिति कथनं सुविदितम्। अतएव प्रजापतिना निर्मितत्वात्, जगतो मातृक्ल्पत्वाच्च नद्याः मातृत्वं प्रतिपादितमिति।

(ग) प्रयोगः – अ) *अस्मा आपो मातरः सप्त ...* (ऋ. – 8.96.1, सा.भा. –*आपो.../ सर्वतो व्याप्ताः मातरः जगतां निर्मात्र्यः सप्त सप्तसंख्यकाः सिन्धवः सन्द्यमानाः गङ्गाद्याः नद्यः...*) इति। आ) *सप्त स्वसारो अभि मातरः शिशुं नवं ...* (ऋ. – 9.86.36, सा.भा. –*सप्त सर्पणस्वभावाः सप्तसंख्याका वा मातरः मातृस्थानीया गङ्गायमुनाद्याः शिशुं शिशुस्थानीयं...*) इत्यादयः।

**37. नद्यः –** निघण्टूक्तेषु नदीवाचकेषु नद्य एवान्तिमपदम् तथा सप्तत्रिंशत्तमपदम्।[184] इदानीं शब्दस्यास्य रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणं च निर्णीयेते यथामतिः –

(क) रूपार्थसमीक्षणम् – भ्वादिगणे शब्दार्थवाचकेन परस्मैपदिना नद्-धातुना[185] सह अच्-प्रत्यय-योगेन[186] नद-इति निष्पद्यते। ततः स्त्रीलिङ्गवाचकेन ङीप्-प्रत्यययोगेन[187] नदी-इति निष्पद्यते। प्रातिपदिकस्यास्य प्रथमायाः बहुवचने नद्यः – इति स्थितम्।

(ख) तत्त्वार्थसमीक्षणम् – नदन्ति शब्दन्ति इति नद्यः।[188] प्रवहनकाले नदी सगर्जनं प्रवहतीति तस्याः नद्याः नद्यस्त्वं प्रतिपादितम्।

(ग) प्रयोगः – अ) *अक्रन्दयो नद्यो३ रोरुवद्दना कथा न ...* (ऋ. – 1.54.1, सा.भा. - *... रोरुवत् अत्यर्थं शब्दं कूर्वन् नद्यः नदी वना तत्सम्बन्धीन्युदकानि च अक्रन्दयः शब्दयसि*) इति। आ) *अभीमिन्द्रो नद्यो वव्रिणा हिता विश्वा...* (ऋ. – 1.54.10, सा.भा. –*ईम् इमाः पूर्वोक्ताः नद्याः नदीः आपः। नदनात् नद्यः इति व्युत्पत्त्या नदीशब्देन आप उच्यन्ते ...*) इत्यादयः।

**उपसंहारः –** नैवास्माकमविदितं यद्वै वेदानां गूढार्थत्वात्तद्बोधनाय वेदार्थकुशलैराचार्यैः सुबोधानि शिक्षादीनि षड्वेदाङ्गानि प्रवर्तितानि विद्यास्थानरूपेण। प्रधानञ्चेदं वेदाङ्गं वेदपुरुषस्यार्थावगमनाय। तत्र खलु शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति षडङ्गेष्वेतेषु निरुक्तं नाम ह्येकं वेदाङ्गमिति सर्वैरेव ज्ञायते। भगवता यास्काचार्येण नैघण्टुक-नैगम-

दैवतकाण्डरूपेण त्रिविधं काण्डं समाम्नायं निरुक्तग्रन्थस्यास्य। तत्र निघण्टु एव वैदिककोशो ग्रन्थः। शब्दराशिरभिधीयते कोशशब्देन। तेन खलु प्रतीयते वैदिकशब्दराशिक्रमः। गवादिगेवपल्यन्तरेव चत्वारिंशच्छतत्रयाधिकसहस्रशब्दराशिरिह विधृतः। तेन हि बोध्यते निघण्टुस्तावद्विशालः कोशग्रन्थः। अत्र खलु वैदिकशब्दानां समाम्नायो दृश्यते। तेषु वैदिकशब्देषु अस्माभिः नदी-शब्दः गृहीतः। सप्तत्रिंशत्संख्यक-नदीवाचकानां शब्दानां रूप-तत्त्वार्थसमीक्षणं कृतमस्माभिः यथामति अस्मिन्नेव गवेषणापत्रे।

नदीमातृको देशोऽस्माकमिदं भारतवर्षम्। नदीनाम जलप्रवाहः। प्रवाहमानता भवति जीवनद्योतिका। जीवनयोनिस्तु नद्य एवेति निश्चप्रचं वक्तुमलम्। अपि तु जलमेवास्माकं जीवनम्। तत्र कदापि अभुक्ताः जीवाः जलमतिरिच्य जीवनं धारयितुमपि न शक्नुवन्ति। तदर्थं निघण्टुसमुल्लिखितानां मातृकल्पानां नदीवाचकशब्दानां रूपार्थसमीक्षणं तत्त्वार्थसमीक्षणमेवास्य गवेषणानिबन्धस्य मुख्योद्देशोऽस्ति। निरुक्तमाश्रित्यैव विविधानां ग्रन्थानां संग्रथनं संरचनञ्च सुधिजनसमाजे तथा पाठकसमाजे सुप्रचलितमिति दृश्यत इति। परन्तु अस्माकमिदं शोधपत्रसदृशं किमपि शोधपत्रमधुना पाठकसमाजे नोपलभ्यत इति कृत्वाऽत्र विषयनिर्वाचने मम क्षोदिष्ठः प्रयास एवेति। परन्तु कथं तावन्नदीशब्दः? सुविदितं सर्वैर्यत् — नदीमातृकोऽयमस्माकं भारतवर्षो देशः। परोपकाराय हि सा वहन्ति प्रवहन्ति। तदभावे परोक्षतया जलाभावे मनुष्यजीवनमस्तित्वविहीनमिति प्रतिपादितम्। स्मर्यते केचन प्रसिद्धश्लोकाः –

छायां प्रकुर्वन्ति नमन्ति पुष्पैः फलानि यच्छन्ति तटद्रुमा ये।
उन्मुल्य तानेव नदी प्रयाति तरङ्गिणां क्व प्रतिपन्नमस्ति॥ इति। पुनरपि,
तटिनि तटद्रुमपातनपातकमेकं चिरस्थायि॥ इत्यादयः।

## Endnotes

1. पस्पशा, दण्डस्वामी दामोदर आश्रम, पृ. - 186
2. ऐतरेयब्राह्मणे सायणाचार्यकृता भाष्यभूमिका
3. पा.शि. – 41-42
4. तमिमं समाम्नायं निघण्टव इत्याचक्षते (नि. -1.1.1.3)
5. निघण्टवः कस्मात्, निगमा इमे भवन्ति (नि. -1.1.1.4)
6. नाट्य. – 6.12-13
7. नि. -1.1.1.5
8. अपि वाहननादेव स्युः, समाहृता भवन्ति (नि. -1.1.1.6)
9. यद्वा समाहृताः भवन्ति (नि. – 1.1.1.7)
10. तद्यान्येतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च तानीमानि भवन्ति (नि. – 1.1.1.8)
11. निघ. – 1.13.1
12. अव रक्षणगतिकान्तिप्रीति – भ्वा.पर.धा.पा. - 600
13. अर्तिसृधृधम्य... (उ. – 2.102) 259

14. दे.य. – अवति प्रजाः... (निघ. – 1.1.9)
15. दे.य. – अवन्ति जगत् स्वोदकेन, अव्यन्ते प्राणिभिस्तीरादिनिर्माणेन... (निघ. – 1.13.1)
16. निघ. – 1.13.2
17. या प्रापणे – अ.पर.धा.पा. – 1049
18. शेवयह्व ... (उ. – 1.152) 152
19. पा. – 3.1.144
20. निघ. – 1.13.2 (दे.य.)
21. निघ. – 1.13.3
22. स्वन् शब्दे – भ्वा.पर.धा.पा. - 827
23. अन्येष्वपि दृश्यते (पा. – 3.2.101)
24. निघ. – 1.13.4
25. स्वन् शब्दे – भ्वा.पर.धा.पा. - 827
26. शुसिचिमीनां दीर्घश्च (उ. – 2.26) 183
27. निघ. – 1.13.5
28. स्रु गतौ – भ्वा.पर.धा.पा. - 940
29. स्रुरीभ्यां तुट् च (उ. – 4.201) 641
30. अम. – 1.2.56
31. झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी (गी. – 10.31)
32. निघ. – 4.4.113
33. निघ. – 1.13.6
34. इण् गतौ – दा.पर.धा.पा. - 1045
35. सर्वधातुभ्योऽसुन् (उ. – 4.188) 628
36. बह्वाऽदिभ्यश्च (पा. – 4.1.45)
37. निघ. – 1.13.7
38. धुञ् कम्पने – स्वा.उ.धा.पा. - 1255
39. घृणिपृश्निपार्ष्णि (उ. – 4.52) 492
40. निघ. – 1.13.7 (दे.य.)
41. निघ. – 1.13.8
42. रुजो भङ्गे – तु.पर.धा.पा. - 1416
43. निघ. – 1.13.8
44. ऋ. – 1.31.6 (सा.भा.)
45. निघ. – 1.13.9
46. वक्ष रोषे संघाते च – भ्वा.पर.धा.पा. – 663
47. क्रुधमण्डार्थेभ्यश्च (पा. – 3.2.151)
48. युवोरनाकौ (पा. – 7.1.1)

49. हलन्त्यम् (पा. – 1.3.3), तस्य लोपः (1.3.9)
50. रषाभ्यां नो णः समानपदे (पा. – 8.1.4)
51. निघ. – 1.13.9 (दे.य.)
52. निघ. – 1.13.10
53. स्वाद् आस्वादने – भ्वा.आ.धा.पा. – 28
54. सर्वधातुभ्योऽसुन् (उ. – 4.188) 628
55. निघ. – 1.13.10 (दे.य.)
56. निघ. – 1.13.10 (दे.य.)
57. निघ. – 1.13.10 (दे.य.)
58. निघ. – 1.13.11
59. रुधिर् आवरणे – रु.उ.धा.पा. - 1438
60. डुकृञ् करणे – त.उ.धा.पा. - 1472
61. निघ. – 1.13.11
62. निघ. – 1.13.12
63. हृञ् हरणे. – भ्वा.उ.धा.पा. - 899
64. हृश्याभ्यामितन् (उ. – 3.93) 373
65. दे.य. - हरन्ति वृक्षगुल्मादीनि वेगेन (निघ. – 1.13.12)
66. निघ. – 1.13.13
67. सृ गतौ - भ्वा.पर.धा.पा. - 935
68. हृश्याभ्यामितन् (उ. – 3.93) 373
69. निघ. – 1.13.14
70. अहि गतौ – भ्वा.आ.धा.पा. - 635
71. जत्वादयश्च (उ. – 4.102) 542
72. छन्दस्युभयथा (पा. – 6.4.86)
73. निघ. – 1.13.14
74. निघ. – 1.13.15
75. णभ हिंसायाम् – दि.पर.धा.पा. - 1240
76. णभ हिंसायाम् – क्र्या.पर.धा.पा. - 1520
77. दाभाभ्यां नुः (उ. – 3.32) 312
78. निघ. – 1.13.16
79. वह प्रापणे – भ्वा.उ.धा.पा. - 1004
80. वहो धश्च (उ. – 1.83) 83
81. निघ. – 1.13.17
82. हर्य गतिकान्त्योः – भ्वा.पर.धा.पा. – 544
83. हर्यतेः कन्यन् हिर च (उ. – 5.44) 772

84. वृञ् वरणे – स्वा.उ.धा.पा. – 1254
85. ऋजेन्द्राग्रवज्रविप्र (उ. – 2.29) 186
86. निघ. – 1.13.17 (दे.य.)
87. निघ. – 1.13.17 (दे.य.)
88. निघ. – 1.13.18
89. रुह बीजजन्मनि प्रादुर्भावे च – भ्वा.पर.धा.पा. – 859
90. हृसृरुहियुषिभ्य इतिः (उ. – 1.97) 97
91. दे.य. – 1.13.18
92. निघ. – 1.13.20
93. स्रु गतौ – भ्वा.पर.धा.पा. - 940
94. क्विप् च (पा. – 3.2.76)
95. दे.य. – सस्रुतः सङ्गता इति माधवः (निघ. – 1.13.19)
96. निघ. – 1.13.19 (दे.य.)
97. निघ. – 1.13.20
98. ऋणु गतौ तन.उ.धा.पा. - 1467
99. पा. – 3.1.134
100. उदके नुट् च (उ. – 4.196) 636
101. निघ. – 1.13.20 (दे.य.)
102. निघ. – 1.13.21
103. स्यन्दू प्रस्रवणे – भ्वा.आ.धा.पा. - 761
104. स्यन्देः सम्प्रसारणं धश्च (उ. – 1.11) 11
105. निघ. – 1.13.21 (दे.य.)
106. निघ. – 1.13.22
107. कुल संस्त्याने – भ्वा.पर.धा.पा. - 842
108. भवे छन्दसि (पा. – 4.4.110)
109. निघ. – 1.13.22 (दे.य.)
110. निघ. – 1.13.22 (दे.य.)
111. अम – 1.10.34
112. पा. – 4.4.98
113. अभि. - कुल्याम्भोभिः पवनचपलैः शाखिनो धौतमूलाः (प्रथमाङ्कः)
114. निघ. – 1.13.23
115. वृञ् वरणे – स्वा.उ.धा.पा. - 1254
116. अच इः (उ. – 4.138) 578
117. बह्वाऽदिभ्यश्च (पा. – 4.1.45)
118. निघ. – 1.13.24

119.ऊर्णुङ् आच्छादने (अ.उ.धा.पा. - 1039)
120.(उ. – 1.31) 31
121.पा. – 4.1.144
122.निघ. – 1.1.10
123.दे.य. – महत्यो नद्यः छादयित्र्यो वा भूमेः स्वेनोदकेन (निघ. – 1.13.24)
124.निघ. – 1.13.25
125.इण् गतौ . – अ.पर.धा.पा. - 1046
126.इरा भूवाक्सुराप्सु (अम. – 3.3.536)
127.निघ. – 1.13.26
128.पर्व पूरणे. – भ्वा.पर.धा.पा. - 577
129.भृमृशीतृचरित् (उ. – 1.7) 7
130.निघ. – 1.13.27
131.अम. – 1.10.30
132.दे.य. – सर्वदा गमनस्वभावः (निघ. – 1.13.27)
133.निघ. – 1.13.28
134.ऊर्ज बलप्राणनयोः – चु.उ.धा.पा. - 1549
135.सर्वधातुभ्योऽसुन् (उ. – 4.1)
136.पा. – 5.2.121
137.पा. – 5.2.122
138.पा. – 1.4.19
139.निघ. – 1.13.28 (दे.य.)
140.निघ. – 1.13.19
141.पा पाने – भ्वा.पर.धा.पा. - 925
142.सर्वधातुभ्योऽसुन् (उ. – 4.188) 628
143.पा. – 5.2.121
144.पा. – 5.2.122
145.पा. – 4.1.6
146.पा. – 1.4.19
147.निघ. – 1.13.19 (दे.य.)
148.निघ. – 1.13.30
149.सृ गतौ – भ्वा.पर.धा.पा. - 935
150.सर्वधातुभ्योऽसुन् (उ. – 4.188) 628
151.सरति स्रियते वा सरः (निघ. – 1.12.38)
152.सर इत्युदकनाम सर्तेः (नि. – 9.26.3)
153.ऋ. – 6.61.2

154.निघ. – 1.13.31
155.तृ प्लवनतरणयोः – भवा.पर.धा.पा. – 969
156.सर्वधातुभ्योऽसुन् (उ. – 4.188) 628
157.शब्दकल्पद्रुमः
158.दे.य. - 1.13.31
159.निघ. – 1.13.32
160.हृञ् हरणे – भ्वा.उ.धा.पा. - 899
161.सर्वधातुभ्योऽसुन् (उ. – 4.188) 628
162.नि. – 4.3.19
163.निघ. – 1.13.33
164.रुधिर् आवरणे – रु.उ.धा.पा. - 1438
165.सर्वधातुभ्योऽसुन् (उ. – 4.188) 628
166.निघ. – 1.13.33 (दे.य.)
167.निघ. – 1.13.34
168.भासृ दीप्तौ - भ्वायआ.धा.पा. - 624
169.पा. – 1.4.19
170.अम. – 1.4.34
171.दे.य. – 1.13.34
172.निघ. – 1.13.35
173.अज गतिक्षेपणयोः – भ्वा.पर.धा.पा. - 230
174.अजिर – शिथिल-शिशिर ... (उ. – 1.53) 53
175.निघ. – 1.13.35 (दे.य.)
176.निघ. – 2.15
177.निघ. – 1.13.35 (दे.य.)
178.निघ. – 1.13.36
179.मा माने. – अ.पर.धा.पा. - 1062
180.तृनतृचौ शंसिक्षदादिभ्यः (उ. – 2.93) 250
181.पा. – 4.1.10
182.गी. – 7.6
183.गी. – 7.7
184.निघ. – 1.13.37
185.नद अव्यक्ते – भ्वा.पर.धा.पा. - 54
186.पचाद्यच् (पा. – 3.1.134)
187.टिड्ढाणञ्द्वयसज्... (पा. – 4.1.15)
188.दे.य. - नदन्ति नद्यः (निघ. – 1.3.37)

## Abbreviations

* अ.उ.धा.पा. – अदादिगणीय-उभयपदी-धातुपाठः
* अभि. – अभिज्ञानशकुन्तलम्
* अ./अदा.पर.धा.पा. – अदादिद्णीय-परस्मैपदी-धातुपाठः
* अम. – अमरकोशः
* उ. – उणादिसूत्रम्
* ऋ. – ऋग्वेदः
* क्या.उ.धा.पा. – क्रादिगणीय-उभयपदी-धातुपाठः
* क्या.पर.धा.पा. – क्र्यादिगणीय-परस्मैपदी-धातुपाठः
* गी. – श्रीमद्भगवद्गीता
* चु.उ.धा.पा. – चुरादिगणीय-उभयपदी-धातुपाठः
* त./तन.पर.धा.पा. – तनादिगणीय-परस्मैपदी-धातुपाठः
* तन.उ.धा.पा. – तनादिगणीय-उभयपदी-धातुपाठः
* तु.पर.धा.पा. – तुदादिगणीय-परस्मैपदी-धातुपाठः
* दि.पर.धा.पा. – दिवादिगणीय-परस्मैपदी-धातुपाठः
* दे.य. – देवयज्वा
* नाट्य. – नाट्यशास्त्रम्
* नि. – निरुक्तम्
* निघ. – निघण्टुः
* पा. – पाणिनिः
* पा.शि. – पाणिनीयशिक्षा
* भ्वा.आ.धा.पा. – भ्वादिगणीय-आत्मनेपदी-धातुपाठः
* भ्वा.उ.धा.पा. – भ्वादिगणीय-उभयपदी-धातुपाठः
* भ्वा.पर.धा.पा. – भ्वादिगणीय-परस्मैपदी-धातुपाठः
* मनु. – मनुस्मृतिः
* रु.उ.धा.पा. – रुधादिगणीय-परस्मैपदी-धातुपाठः
* सा.भा. – सायणभाष्यम्
* स्वा.पर.धा.पा. – स्वादिगणीय-परस्मैपदी-धातुपाठः

## Bibliography


- *अमरकोषः अमरार्थचन्द्रिका* वा। सम्पा. – गुरुनाथ-भट्टाचार्यः। कोलकाता : संस्कृत-पुस्तक-भाण्डारः, 1417 वङ्गाब्दः।
- *अष्टाध्यायी।* चन्द्रलेखा हिन्दीव्याख्यायुताऽनेकोपयोगिविषयैरूपबृंहितासूत्रपाठ-सूत्रवार्तिकोदाहरणानां सूच्या चान्विता। मदर्षि-पाणिनिः। व्याख्याकारः-ईश्वरचन्द्रः। प्रथम

-द्वितीयभागः, व्रजजीवन प्राच्यभारती ग्रन्थमाला 103, दिल्लीः चोखम्बासंस्कृत प्रतिष्ठान, 2004.

- *अष्टाध्यायी*। सम्पा. – तपनशङ्कर-भट्टाचार्यः। कोलकाता : संस्कृत-वुक-डिपो, 2004.
- *धातुप्रदीपः* श्रीशचन्द्रचक्रवर्तिकृत-धातुप्रदीपविवरणसहितः। मैत्रेयरक्षितरचितः। सम्पा. – करुणासिन्धुदासः। कोलकाता : संस्कृत पुस्तक भाण्डार, 2003.
- *निरुक्तम्*, यास्कप्रणीतम्। सम्पा. – अमरेश्वरठाकुरः। कोलकाता : कोलकाता विश्वविद्यालयः, पुनर्मुद्रितसंस्करणम्, 2003.
- *निरुक्तम्*, यास्कप्रणीतम् (प्रथम-द्वितीयाध्यायः)। सम्पा. – उमाशङ्करशास्त्री। विद्याभवन संस्कृतग्रन्थमाला 57 । वाराणसी : चौखम्बाविद्याभवन, 2017.
- *निरुक्तम्* (निघण्टु)। आचार्य-यास्कः। सम्पा. – मनसुखराय मोर। श्रीदेवराजयज्वकृतटीकासनाथीकृतंप्रथमो भागः, कोलकाता, 1952.
- *निरुक्तम्* (निघण्टु) आचार्य-यास्कप्रणीतम्, (श्रीदेवराजयज्वकृत *निर्वचन* नाम टीका सहितम्)। सम्पा.– देवराजयज्वः। प्रथमो भागः। गुरुमण्डलग्रन्थमाला – 10. कोलकाता : क्लाइव रो, 1952.
- *वैदिक-निघण्टु-सङ्ग्रहः*। सम्पा.– धर्मवीरो विद्यावारिधिः। प्राच्यविद्यानुसन्धानग्रन्था-मालाप्रथमं प्रसूनम्, बहालगढ, 1989.
- *वैयाकरणसिद्धान्तकौमुदी*, भट्टोजीदीक्षितविरचिता। सम्पा.- रामचन्द्र झा। व्याख्याकारः - सत्यनारायण शास्त्री खण्डुडी। *इन्दुमती*-संस्कृत-हिन्दीव्याख्या-विविधपरिशिष्ट टिप्पणी (नोटस्) सहिता (ण्यन्तादि-समाप्त्यन्तो भागः), पुनर्मुद्रणम्, कृष्णदास संस्कृत सीरीज् 13, वाराणसीः कृष्णदासअकादमी, 2002.
- *वैदिक-पदानुक्रम-कोषः*। सम्पा.-विश्वबन्धु। संहिताभागः, शान्तकुटीवैदिकग्रन्थमाला, होशियारपुरः विश्वेश्वरानन्द-वैदिक-शोध-संस्थान, प्र.भागः (अ)-द्वि.स., 1976; द्वि.भागः (अ-घ)-द्वि.स., 1985; तृ.भागः (च-न) -1956; च.भागः (प-स) -1959; प.भागः (व-स)-1962.
- *Indian Etymologists And Their Etymologies*. Dipak Bhattacharya. Kolkata: School of Vedic Studies, Rabindra Bharati University, 2002.
- *The Vedic Etymology, A Critical evaluation of the Science of Etymology as found in Vedic literature.* Fatah Singh. The Chaukhamba Surbharti Studies 6, rpt. Varanasi: Chaukhamba Surbharti Prakashan, 2008.